# कारकप्रकरणम्  आचार्यद्वितीयवर्षम्

1.सम्बोधनं प्रथमार्थः इत्यत्र किं प्रमाणम्?

2.नागेशमते किन्नाम कारकत्वम्?

3."स्तोकं पचति" इत्यत्र द्वितीयार्थः क: ?

4.कर्तुरीप्सिततमं कर्म इति सूत्रे तमप्ग्रहणं किमर्थम्?

5.किं नाम फलत्वम्?

6.'कर्मणि द्वितीया'इति सूत्रे कर्मपदेन किं गृह्यते?

7.'कर्मयुक्स्यादकथितन्  तथा.....' इत्यत्र कर्मयुक्शब्दस्य कोर्थः?

8.'अकथितञ्च' इतिसूत्रविहितद्वितीयायाः कोर्थः?

9.दण्डधात्वर्थः कः?

10.मन्थधात्वर्थः कः?

11.'अकर्मकधातुभिर्योगे' इति वार्तिके अकर्मकशब्देन कस्य ग्रहणम्?

12.कर्माख्यातस्थले आख्यातार्थः कः?

13.भोजनं यतते इति प्रयोगः कुतो न भवति?

14.उपपदविभक्तीनां कः अर्थः?

15.'जपमनु प्रावर्षत्' इत्यत्र द्वितीयार्थः कः?

16.'लक्ष्मी हरिं प्रति' इत्यस्मात् वाक्यात् को बोधः?

17.'मासमधीते' इत्यत्र द्वितीयार्थः कः?

18.कारकतृतीयायाः कोर्थः?

19.किन्नाम स्वातन्त्र्यम्?

20.'नाम्ना सुतीक्ष्णः' इत्यत्र तृतीयार्थः कः?

21 .'सहयुक्ते अप्रधाने' इति सूत्रे सहशब्दार्थः कः?

22.'दण्डेन घटः'इति वाक्यात् कीदृशो बोधः?

23.किन्नाम सम्प्रदानत्वम्?

24.'खण्डिकोपाध्यायस्तस्मै चपेटां ददाति' इत्यत्र दाधात्वर्थः कः?

25.रुच्धात्वर्थः कः?

26.'भक्ताय धारयति मोक्षं हरिः' इत्यस्मात् वाक्यात् कः बोधः?

27.'अध्ययनाय वसति' इत्यस्य वाक्यार्थः कः ?

28.'क्लृपि सम्पद्यमाने च' इति वार्तिकस्यार्थः कः?

29.'एषोर्घ्यः शिवाय नमः' इत्यत्र नमश्शब्दार्थः कः?

30.कारकविभक्तिरूपपञ्चम्याः अर्थः कः?

31.'वृक्षात् पर्णं पतति' इति वाक्यात् को बोधः?

32 .'ब्रह्मणः प्रजाः प्रजायन्ते' इत्यत्र पञ्चम्यर्थः कः?

33.'ऋते कृष्णात् नोत्पद्यते सुखम्' इत्यत्र ऋतेशब्दार्थः पञ्चम्यर्थश्च कः?

34.किन्नाम कालगतमर्यादात्वम्?

35.'एकापि षष्ठी विषयभेदात् भिद्यते' इदं वाक्यं भाष्ये कुत्र उक्तम्?.

36.'अन्नस्य हेतोर्वसति'  इत्यस्मात् वाक्यात् को बोधः?

37.क औपश्लेशिक आधारः?

38.'सर्वस्मिन्नात्मा अस्ति' इत्यस्मात् वाक्यात् को बोधः?

39.'अधीति व्याकरणे' इत्यत्र कस्मिन्नर्थे क्तप्रत्ययः?

40.'यस्य च भावेन भावलक्षणम्' इति सूत्रस्य मञ्जूषोक्तरीत्या  अर्थः कः?

41.'यतश्च निर्धारणे' इति सूत्रे 'यतः' इति पदं किमर्थम्?

42.निर्धारणविभक्तेः अर्थः कः?

43.'मथुराः पाटलीपुत्रेभ्यः आढ्यतराः'इत्यत्र केन सूत्रेण पञ्चमी?

44.'चर्मणि द्वीपिनं हन्ति' अत्र सप्तम्यर्थः क।?

45 .कारकसप्तम्याः कोर्थः?

46.राहोः शिरः इत्यत्र कथं षष्ठी?

47 .'स्तोकेन स्तोकाद् वा मुक्तः' इत्यत्र तृतीयापञ्चम्यौ कस्मिन्नर्थे?

48.'शतात् बद्धः' इत्यत्र पञ्चम्यर्थः कः?

49."ग्रामे गच्छति","ग्रामं गच्छति " इत्युभयं कथं साधु?

50.मूलेनावाहयेद् देवीमिति वाक्यात् कीदृशो बोधः?

--------*****--------